अपमृत्युं न चाप्नोति सत्यं सत्यं हि नान्यथा ॥
यैर्भगिन्यः सुवासिन्यो वस्त्रालङ्कारतोषिताः ।
न तेषां वत्सरं यावत् कलहो न रिपोर्भयम् ॥
व्रतस्यास्य प्रसादेन भूताः प्रेताश्च राक्षसाः ।
दूरादेव पलायन्ते धर्म्मराजेन ताड़िताः ॥
यो देवो महिषारूढ़ो दण्डमुद्गरधारकः ।
वेष्टितः किङ्करैर्दृष्टैस्तस्मै कालात्मने नमः ॥
इत्थं त्वं द्विजशार्दूल ! कुरुष्व तद्व्रतं शुभम् ।
रम्यं यमद्वितीयाख्यमपमृत्युनिवारणम् ॥
व्रतस्यास्य प्रभावेन पुत्त्रपौत्त्रसमन्वितः ।
सत्यं वदामि ते विप्र ! गृहस्थः स्यात् सदैव हि ॥
गार्हस्थ्येन समो धर्म्मो न भूतो न भविष्यति ।
सन्देहोऽत्र न कर्त्तव्य इह लोके परत्र च ॥
ये वै यमद्वितीयाख्यं व्रतं कुर्व्वन्ति मानवाः ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥
अपुत्त्रो लभते पुत्त्रं धनहीनो लभेद्धनम् ।
भार्य्याहीनो लभेद्भार्य्यां सुरूपां कुलसम्भवाम् ॥
यस्यां तिथौ यमुनया यमराजदेवः
संभोजितः सकललोकनिपातदक्षः ।
तस्यां भुनक्ति सुतिथौ च गृहे भगिन्याः
प्राप्नोति वित्तमतुलं स चिरायुरेव ॥”
इति पाद्मे उत्तरखण्डे १२५ अध्यायः ॥

यमधारः, पुं, (यमा युग्मीभूता धारास्य । यद्वा, यमवत् विनाशिका धारा यत्र ।) पार्श्वद्वयधारायुक्तास्त्रविशेषः । किरीच काटार इत्यादि भाषा ॥

यमनं, क्ली, (यम्+भावे ल्युट् ।) बन्धनम् । उपरतिः । इति मेदिनी । ने, ९११ ॥ (संयमः । यथा, हरिवंशे भविष्यपर्व्वणि । १६ । ४८ ।
“अणुर्वामननामासि यतस्त्वं वामनाख्यया ।
मननान्मुनिरेवासि यमनाद् यतिरुच्यसे ॥”)

यमनः, पुं, (यमयति नियमयतीति । यम्+ल्युः ।) यमः । इति मेदिनी । ने, १११ ॥ (यमयति वशमानयतीन्द्रियग्राममिति । संयमकर्त्तरि, त्रि । यथा, वाजसनेयसंहितायाम् । ९ । २२ ।
“यन्तासि यमनो ध्रुवोऽसि धरुणः ।”
“यमनः स्वयं संयमनकर्त्ता भवसि ।” इति तद्भाष्ये महीधरः ॥ नियमकारिणि च त्रि । यथा, तत्रैव । १४ । २२ ।
“यन्त्री राड़्यन्त्र्यसि यमनी ध्रुवासि धरित्री ।”
“यमनी सर्व्वेषां नियमकारिण्यसि ।” इति तद्भाष्ये महीधरः ॥)

यमनिका, स्त्री, (यच्छति आवृणोतीति । यम्+ल्युः । कन् । टाप् ।) यवनिका । इत्यमरटीकायां रामाश्रमः ॥ कानात् इति भाषा ॥

यमपत्नी, स्त्री, (यमस्य पत्नी ।) यमस्य भार्य्या । यमस्य द्वे भार्य्ये । धूमोर्णा १ विजया २ । इति जटाधरः ॥

यमप्रियः, पुं, (प्रीणातीति । प्री+कः । यमस्य प्रियः ।) वटवृक्षः । इति शब्दरत्नावली ॥

यमभगिनी, स्त्री, (यमस्य भगिनी स्वसा ।) यमुना । इति हेमचन्द्रः । ४ । १६८ ॥

यमराजः, पुं, (यमश्चासौ राजा चेति । “राजाहःसखिभ्यष्टच् ।” ५।४।९१ । इति टच् ।) यमः । इति हेमचन्द्रः । २।९९ ॥ अस्य पुर्य्यादि यथा,
“पुरी संयमनी तस्य चित्रगुप्तस्तु लेखकः ।
भृत्यौ चण्डमहाचण्डौ धूमोर्णाविजये प्रिये ।
विचारभूमिका नीचिः सहायाः कालपूरुषाः ॥”
इति जटाधरः ॥ * ॥
स च विमात्रा छायया शप्तः । (यथा, मार्कण्डेये । ७७ । २५—२९ ।
“छायासंज्ञा त्वपत्येषु यथा स्वेष्वतिवत्सला ।
तथा न संज्ञाकन्यायां पुत्त्रयोश्चान्ववर्त्तत ॥
लालनाद्युपभोगेषु विशेषमनुवासरम् ।
मनुस्तत्क्षान्तवानस्या यमस्तस्या न चक्षमे ॥
ताड़नाय च वै कोपात् पादस्तेन समुद्यतः ।
तस्याः पुनः क्षान्तिमता न तु देहे निपातितः ॥
ततः शशाप तं कोपात् छायासंज्ञा यमं द्विज ।
किञ्चित् प्रस्फुरमाणोष्ठी विचलत्पाणिपल्लवा ॥
पितुः पत्नीममर्य्यादं यन्मां तर्ज्जयसे पदा ।
भुवि तस्मादयं पादस्तवाद्यैव पतिष्यति ॥”)
तच्छापान्तं यथा,—
“स्वरूपधारिणीं चैमामानिनाय निजाश्रमम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥
ततः पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयस्तु यमः शापाद्धर्म्मदृष्टिरभूत् सुतः ॥
क्रिमयो मांसमादाय पादतस्ते महीतलम् ।
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयम् ॥
धर्म्मदृष्टिर्यतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगं तं याम्ये चकार तिमिरापहः ॥
यमुना च नदी जज्ञे कलिन्दान्तरवाहिणी ॥”
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे । ७८ । २५—२९ ॥

यमराट्, [ज्] पुं, (प्राणिसंयमनात् यमप्रभृतयः किङ्करास्तेषु राजते यमेन संयमेन राजते इति वा । राज्+क्विप् । इत्यमरटीकायां रघुनाथः ।) यमः । इत्यमरः । १ । १ । ६६ ॥

यमलं, क्ली, (यमं लातीति । ला+कः ।) युग्मम् । इति हेमचन्द्रः । ६ । ६० ॥ (त्रि, यमजः । यथा, देवीभागवते । ३ । २८ । ५ ।
“सुमित्रातनयौ जातौ यमलौ द्वौ मनोहरौ ।
ते जाता वै किशोराश्च धनुर्व्वाणधराः किल ॥”)

यमलपत्रकः, पुं, (यमलं यमजं पत्रमस्य । बहुब्रीहौ कः ।) अश्मन्तकवृक्षः । कोविदारवृक्षः । इति राजनिर्घण्टः ॥

यमलार्ज्जुनहा, [न्] पुं, (यमलार्ज्जुनौ हतवान् इति । हन्+क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥

यमलार्ज्जुनौ, पुं, (यमलौ च तावर्ज्जुनौ चेति कर्म्मधारयः ।) गोकुलस्यार्ज्जुनवृक्षद्वयम् । तौ कुवेरपुत्त्रौ नलकूवरमणिग्रीवौ । नारदशापात् वृक्षतां गतौ श्रीकृष्णेन उद्धारितौ । यथा,—
“यदिमौ लोकपालस्य पुत्त्रौ भूत्वा तमःप्लुतौ ।
न विवाससमात्मानं विजानीतः सुदुर्म्मदौ ॥
अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः ।
स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥
वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते ।
वृत्ते स्वलोकतां भूयो लब्धभक्ती भविष्यतः ॥
श्रीशुक उवाच ।
स एवमुक्त्वा देवर्षिर्गतो नारायणाश्रमम् ।
नलकूवरमणिग्रीवावासतुर्यमलार्ज्जुनौ ॥
ऋषेर्भागवतमुख्यस्य सत्यं कर्त्तुं वचो हरिः ।
जगाम शनकैस्तत्र यत्र स्तो यमलार्ज्जुनौ ॥
देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ ।
तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना ॥
इत्यन्तरेणार्ज्जुनयोः कृष्णस्तु यमयोर्ययौ ।
आत्मनिर्व्वेशमात्रेण तीर्य्यग्गतमुदूखलम् ॥
बालेन निष्कर्षतान्वगुदूखलं तत्
दामोदरेण तरसोत्कलिताङ्घ्रिबन्धौ ।
निष्पेततुः परमविक्रमितातिवेप-
स्कन्धप्रवालविटपौ कृतचण्डशब्दौ ॥
तत्र श्रिया परमया ककुभः स्फुरन्तौ
सिद्धावुपेत्य कुजयोरिव जातवेदाः ।
कृष्णं प्रणम्य शिरसाखिललोकनाथं
बद्धाञ्जली विरजसाविदमूचतुः स्म ॥
वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्म्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत्प्रणामे
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥
श्रीभगवानुवाच ।
तद्गच्छतं मत्परमौ नलकूवरसादनम् ।
संजातो मयि भावो वामीप्सितः परमोऽभवः ॥
श्रीशुक उवाच ।
इत्युक्तौ तं परिक्रम्य प्रणम्य च पुनः पुनः ।
बद्धोलूखलमामन्त्र्य जग्मतुर्दिशमुत्तराम् ॥”
इति श्रीभागवते १० स्कन्धे १० अध्यायः ॥

यमली, स्त्री, (यमल+स्त्रियां ङीष् ।) चोटिकाद्वयम् । इति मेदिनी । ले, १२६ ॥ चोटी शाटीपर्य्याये हेमचन्द्रेण गणिता सैव चोटिका ॥

यमवाहनः, पुं, (यमस्य वाहनः ।) महिषः । इति हेमचन्द्रः । ४ । ३२७ ॥ (तथास्य पर्य्यायः ।
“महिषो घोटकारिः स्यात् कासरश्च रजस्वलः ।
पीनस्कन्धः कृष्णकायो लुलापो यमवाहनः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

यमव्रतं, क्ली, (यमस्य धर्म्मराजस्येव व्रतम् ।) राजधर्म्मविशेषः । स तु पक्षपातं विना पापिनां शासनरूपः । इति पुराणम् ॥

यमस्वसा, [ऋ] स्त्री, (यमस्य स्वसा भगिनी ।) यमुना । दुर्गा । इति मेदिनी । से, ६० ॥ (यदुक्तं हरिवंशे आर्य्यास्तवप्रकरणे । ५८ । ३ ।
“जया च विजया च त्वं तुष्टिः पुष्टिः क्षमा दया ।
ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ॥”)

यमानिका, स्त्री, (यमानी+स्वार्थे कन् ।) यमानी । तत्पर्य्यायः । अजमोदा २ उग्रगन्धा ३ ब्रह्मदर्भा ४ । इत्यमरः । २ । ४ । १३५ ॥
“चत्वारि यमान्याम् । यमानी द्विविधा एका